# Somanatha Lingarchana Upadeshah by Atri

# અત્રિપ્રોક્તસોમનાથલિઙ્ગાર્ચનોપદેશઃ

## Document Information

Text title : Somanatha Lingarchana Upadeshah by Atri

File name : somanAthalingArchanopadeshaHatriprokta.itx

Category : shiva, shivarahasya, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhargAkhyaH panchamAMshaH | adhyAyaH 16| 26-45||

Latest update : June 18, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 18, 2023

*sanskritdocuments.org*

# અત્રિપ્રોક્તસોમનાથલિઙ્ગાર્ચનોપદેશઃ

(શિવગૌરીસંવાદે)

અત્રિઃ -

શ્રૃણુષ્વ મે વચો રાજન્પુનરાપ્યાયયિષ્યસિ ।
શરણં ગચ્છ દેવેશં તપસા શિવપૂજયા ॥ ૧॥

મુનિભિઃ પ્રણતં લિઙ્ગં સૌરાષ્ટ્રે સંસ્થિતં શશિન્ ।
સોમનાથાભિધં લિઙ્ગં પયોષ્ણીતીરસંસ્થિતમ્ ॥ ૨॥

બ્રહ્મવિષ્ણ્વાદિભિર્દેવૈઃ સેવિતં સર્વકામદમ્ ।
તસ્મિન્લિઙ્ગે મહાદેવો નિવસત્યમ્બિકાસખઃ ॥ ૩॥

ઇત્યત્રિવચસા સોમો જ્ઞાત્વા ગત્વા મહેશ્વરમ્ ।
સ્નાત્વા નત્વા મહાદેવં પયોષ્ણ્યાં ધૂતકિલ્બિષઃ ॥ ૪॥

ભસ્મનોદ્ધૂલ્ય સર્વાઙ્ગં તતાપ પરમં તપઃ ।
શિવલિઙ્ગાર્ચનરતઃ પઞ્ચાક્ષરપરાયણઃ ॥ ૫॥

ભસ્મસ્થણ્ડિલસંસ્થશ્ચ રુદ્રમાવર્તયન્ સદા ।
શુશ્રૂષન્ત્યા ચ રોહિણ્યા કન્દપુષ્પફલાદિભિઃ ॥ ૬॥

અતિષ્ઠત્સ તદા મૌની દશવર્ષાણ્યથામ્બિકે ।
તપસ્યતોઽથ સોમસ્ય શક્તિરાસીચ્છિવાજ્ઞયા ॥ ૭॥

સોમનાથમહાલિઙ્ગં બિલ્વપત્રૈઃ સમર્ચયન્ ।
ત્રિકાલમપ્રમાદેન સોમાર્ધકૃતશેખરમ્ ॥ ૮॥

એવં સંવસતસ્તસ્ય સોમઃ સોમાય તોષિતઃ ।
સોમનાથાહ્વયાલ્લિઙ્ગાત્ તસ્મૈ પ્રાદુરભૂચ્છિવઃ ॥ ૯॥

ગઙ્ગાચન્દ્રકલામૈલિર્મહોક્ષવરવાહનઃ ।
ઉમાસંશ્લિષ્ટવામાઙ્ગો ગણવૃન્દનિષેવિતઃ ॥ ૧૦॥

બ્રહ્મવિષ્ણ્વાદિભિર્દેવૈર્મહેન્દ્રાદ્યૈઃ સુરોત્તમૈઃ ।
કુમારગણનાથૈશ્ચ મયા ચ પરિસેવિતઃ ॥ ૧૧॥

ગજગરુડાખુમયૂરહંસયાનૈઃ સુરવર્યૈરનુયાયિભિઃ પૃષ્ઠતોઽગ્રે ।
રાજતાદ્રિનિભપ્રભાવિભાવિતાઙ્ગં વૃષભં કેસરિયાનયાનુયાતઃ ॥ ૧૨॥

અધિરુહ્યામરચામરૌઘવાતૈર્વ્યજનૈઃ છત્રગણૈર્વિશોભિતાઙ્ગ ।
પરશુવરકુરઙ્ગબાલપાણિર્ભગવાનાવિરભૂત્ તદા મહેશઃ ॥ ૧૩॥

–

ઈશ્વરઃ -
તથાઽઽગતં મહાદેવં દૃષ્ટ્વા હૃષ્ટતનૂરુહઃ ।
પ્રણમ્ય સોમઃ સાષ્ટાઙ્ગમષ્ટમૂર્તિં કૃપાકરમ્ ॥ ૧૪॥

તુષ્ટાવ પ્રાઞ્જલિર્ધીરો માં સામ્બં પરમેશ્વરિ ॥ ૧૫॥

–

રાજા -
નમસ્તે મહાદેવ વિશ્વધિકેશ નમસ્તે મહેશાન લોકેશ શમ્ભો ।
નમસ્તે ગણાધીશ વૃન્દારવન્દ્ય નમસ્તે હરિબ્રહ્મમૃગ્યાઙ્ઘ્રિમૌલે ॥ ૧૬॥

નમસ્તે મહોક્ષૈકવાહ પ્રપન્નં સદાઽપાઙ્ગસઙ્ગાદ્ય દૃષ્ટ્યાદ્ય તુષ્ટ્યા । (સઙ્ગાચ્ચયાજાદ્ય)
નમસ્તે ત્વમીશાન વિશ્વૈકવન્દ્ય ક્ષયાર્તિં વિનાશ્યાશુ માં તારયાદ્ય ॥ ૧૭॥

નમસ્તે ભિષગ્વર્ય ભૈષજ્યચિન્તાં વહસ્વાદ્ય મામદ્ય યક્ષ્માદ્યયુક્તમ્ ।
વિમુક્તં કુરુષ્વાદ્ય પાપૌઘજાલૈર્નમસ્તેઽસ્તુ શમ્ભો પ્રસીદ પ્રસીદ ॥ ૧૮॥

–

ઈશ્વરઃ -
ઇતિ સમ્પ્રાર્થિતો દેવઃ સોમરાજ્ઞાથ સંસ્તુતઃ ।
દયાર્દ્રદૃષ્ટ્યા તં વીક્ષ્ય સમાલભ્ય ચ પાણિના ॥ ૧૯॥

પુનઃ પુષ્ટિં તસ્ય ગાત્રે અમૃતૈઃ પૂરયત્ તદા ।
તમાહ વિનયોપેતં સોમં સામ્બસ્તદા મુદા ॥ ૨૦॥

–

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવગૌરીસંવાદે અત્રિપ્રોક્તસોમનાથલિઙ્ગાર્ચનોપદેશઃ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભર્ગાખ્યઃ પઞ્ચમાંશઃ । અધ્યાયઃ ૧૬। ૨૬-૪૫॥

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 16. 26-45..

Notes:

Rishi Atri addresses the King Brhadbala, detailing to him the way of worshipping Somanatha Jyotirlinga located in Saurashtra Shiva Kshetra, at the banks of River Payoshni. The story of Chandra and Rohini is outlined, whereby Chandra is relieved of Daksha's curse by worshipping at Somanatha as guided by Rishi Atri.

The shlokas have been renumbered for readers' convenience.

Proofread by Ruma Dewan

*Somanatha Lingarchana Upadeshah by Atri*

pdf was typeset on June 18, 2023

Please send corrections to *sanskrit@cheerful.com*